1. **सूचनाम् अनुसर्य लिखतु-** [10]

I. पट्टिकातः उचितानि पदानि चित्वा रिक्तस्थानानि पूरयन्तु ।

(क) फलान्यपि परार्थाय __________ सत्पुरुषा इव ।(वृक्षाः, विभूतयः वाक्येषु)

(ख) दशह्रदसमः पुत्रः __________ समो द्रुमः ।(फलानि, दशपुत्रः)

(ग) __________ येषां वै विमुखा यान्ति नार्थिनः ।(सुजनस्येव, परोपकाराय)

(घ) __________ इदं शरीरम् ।(परोपकाराय, वृक्षाः)

**Ans. :** (क) वृक्षाः

(ख) दशपुत्रः

(ग) सुजनस्येव

(घ) परोपकाराय

II. उदाहरणानुसारम् अधोलिखितेषु वाक्येषु स्थूलाक्षरपदानां विभक्तिं निर्दिशन्तु ।

यथा – वृक्षाः अन्यस्य कृते **छायां** कुर्वन्ति । द्वितीया विभक्तिः

(क) वृक्षाः परार्थाय **फलानि** यच्छन्ति । __________

(ख) वृक्षाः **सत्पुरुषाः** इव सन्ति । __________

(ग) **द्रुमः** दशसन्तानसमः भवति । __________

(घ) वृक्षः **प्राणिभ्यः** काष्ठानि यच्छति । __________

**Ans. :** (क) फलानि – द्वितीया विभक्ति

(ख) सत्पुरुषाः – प्रथमा विभक्ति

(ग) द्रुमः – प्रथमा विभक्ति

(घ) प्राणिभ्यः – चतुर्थी विभक्ति

III. अधोलिखितानां पदानां द्विवचने बहुवचने च रूपाणि लिखन्तु ।

| | | |
|---|---|---|
| यथा – वृक्षः | वृक्षौ | वृक्षाः |
| (क) मेघः | __________ | __________ |
| (ख) ह्रदः | __________ | __________ |
| (ग) सत्पुरुषः | __________ | __________ |
| (घ) छाया | __________ | __________ |

**Ans. :**

| | | |
|---|---|---|
| यथा – वृक्षः | वृक्षौ | वृक्षाः |
| (क) मेघः | मेघौ | मेघाः |
| (ख) ह्रदः | ह्रदौ | ह्रदाः |
| (ग) सत्पुरुषः | सत्पुरुषौ | सत्पुरुषाः |
| (घ) छाया | छाये | छायाः |

IV. अधोलिखितानां पदानां परस्परं समुचितं मेलनं कृत्वा 'कः किं ददाति' इति लिखन्तु ।

| | | |
|---|---|---|
| यथा – वृक्षः | शुद्धं | वृक्षः शुद्धं वायुं ददाति । |
| (क) गौः | प्रकाशं | __________ |
| (ख) सूर्यः | तापं | __________ |
| (ग) नदी | दुग्धम् | __________ |

Get More Learning Materials Here : CLICK HERE www.studentbro.in

(घ) अग्निः जलम् ________________

**Ans. :** (क) गौः – गौः दुग्धं ददाति ।

(ख) सूर्यः – सूर्यः प्रकाशं ददाति ।

(ग) नदी – नदी जलं ददाति ।

(घ) अग्निः – अग्निः तापं ददाति

V. अधोलिखितानां क्रियापदानां लट्लकारे प्रथमपुरुषस्य रूपाणि लिखन्तु ।

| | | | |
|---|---|---|---|
| यथा - कुर्वन्ति - | करोति | कुरुतः | कुर्वन्ति |
| तिष्ठन्ति - | ________ | ________ | ________ |
| फलन्ति - | ________ | ________ | ________ |
| यान्ति - | ________ | ________ | ________ |
| पिबन्ति - | ________ | ________ | ________ |

**Ans. :** तिष्ठन्ति – तिष्ठति तिष्ठतः तिष्ठन्ति

फलन्ति – फलति फलतः फलन्ति

यान्ति – याति यातः यान्ति

पिबन्ति – पिबति पिबतः पिबन्ति

*** बहुविकल्पी प्रश्नाः** **[10]**

2. 'वृक्षाः सत्पुरुषाः इव' इति पाठस्य क्रमः कः?

(A) त्रयोदशः (B) पञ्चदश (C) एकादशः (D) चतुर्दशः

**Ans. :** (B) पञ्चदश

3. वृक्षाः कीदृशाः भवन्ति?

(A) अपूज्याः (B) भक्ष्याः (C) कर्तनीयाः (D) पूज्याः

**Ans. :** (D) पूज्याः

4. वृक्षाः कुत्र तिष्ठन्ति?

(A) आतपे (B) शीतले (C) भवने (D) छायायाम्

**Ans.:** (A) आतपे

5. दशहृदसमः कः भवति?

(A) कूपः (B) वापी (C) पुत्रः (D) द्रुमः

**Ans. :** (C) पुत्रः

6. केषां जन्म वरम् अस्ति?

(A) दैत्यानाम् (B) वृक्षाणाम् (C) याचकानाम् (D) दुर्जनानाम्

**Ans. :** (B) वृक्षाणाम्

7. नद्यः किमर्थम् वहन्ति?

(A) स्वार्थाय (B) प्रलयाय (C) निरर्थकम् (D) परोपकाराय

**Ans. :** (D) परोपकाराय

8. 'महीरुहाः' इति पदस्य कोऽर्थः?

Get More Learning Materials Here : CLICK HERE www.studentbro.in

(A) वृक्षाः (B) पर्वताः (C) जनाः (D) नद्यः

**Ans.:** (A) वृक्षाः

9. परोपकाराय केषां विभूतयः भवन्ति?

(A) असताम् (B) बालकानाम् (C) सताम् (D) धनिकानाम्

**Ans. :** (C) सताम्

10. फलानि स्वयं के न खादन्ति?

(A) सज्जनाः (B) वृक्षाः (C) नद्यः (D) दुर्जनाः

**Ans. :** (B) वृक्षाः

11. 'वारिवाहाः' इति पदस्य कोऽर्थः?

(A) वृक्षाः (B) सज्जनाः (C) जलम् (D) मेघाः

**Ans. :** (D) मेघाः

12. **पाठस्य आधारैण प्रश्नानाम् उत्तराणि एकपदेन लिखन्तु ।** **[6]**

I. वृक्षा: स्वयं कुत्र तिष्ठन्ति ?

**Ans. :** आतपे

II. परोपकाराय का वहन्ति ?

**Ans. :** नद्यः

III. दशवापीसमः कः भवति ?

**Ans. :** ह्रदः

IV. सत्पुरुषाः इव के सन्ति?

**Ans. :** वृक्षाः

V. अर्थिनः केभ्यः विमुखाः न यान्ति ?

**Ans. :** वृक्षेभ्यः महीरुहेभ्यः

VI. वृक्षा: स्वयं कानि न खादन्ति ?

**Ans. :** फलानि

13. **पाठस्य आधारेण प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखन्तु ।** **[12]**

I. नद्यः किं न पिबन्ति ?

**Ans. :** नद्यः स्वयमेव अम्भः न पिबन्ति ।

II. वृक्षाः अस्मभ्यं किं किं यच्छन्ति ?

**Ans. :** वृक्षाः अस्मभ्यं पुष्पं फलं, छायां, मूलं वल्कलं, दारूं च यच्छन्ति ।

III. इदं शरीरं किमर्थम् अस्ति ?

**Ans. :** इदं शरीरं परोपकाराय अस्ति ।

IV. दशपुत्रसमः कः भवति ?

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**Ans. :** दशपुत्रसम: द्रुमः भवति ।

V. केषां विभूतयः परोपकाराय भवन्ति ?

**Ans. :** सतां विभूतयः परोपकाराय भवन्ति ।

VI. अन्यस्य छायां के कुर्वन्ति ?

**Ans. :** अअन्यस्य छायां वृक्षाः कुर्वन्ति ।

----- -----

Student Bro

Get More Learning Materials Here : CLICK HERE www.studentbro.in